# CODE- SAN103

# SANSKRIT SAHITYAM

## काव्यलक्षणं मम्मटोक्तम्

काव्यलक्षणविषये नैकानि काव्यलक्षणानि दृष्टिपथम् आयन्ति। काव्यशास्त्रे मुख्यत्वेन आचार्यमम्मटस्य लक्षणं स्वीक्रियते।

**"तददोषौ शब्दार्थौ सगुणावनलंकृती पुनः क्वापि।"**

एतत् लक्षणं काव्यस्य स्वरूपं सर्वाङ्गरूपेण व्यवस्थापयति। **शब्दार्थौ** शब्दार्थयुगलं तत् काव्यम्। अर्थात्- शब्दार्थौ अदोषौ, सगुणौ, सर्वत्र सालङ्कारौ क्वचित् अस्फुटालङ्कारौ अपि काव्यं कथ्यते। **आस्वादव्यञ्जकगतत्वेन** शब्दे अर्थे च समानतया सत्त्वेन काव्यं पठितं श्रुतं, गीतं विरचितं बुद्धमिति व्यवहारदर्शनेन च शब्दार्थयुगलस्य काव्यत्वमेव घटितं भवति। सदोषे प्रसक्तेन काव्यलक्षणे **अतिव्यपदिदोषं** वारयितुम् आह **अदोषौ** इति। अस्य च्युतसंस्कारः, विरुद्धमतिकृत, अविमृष्टविधेयांश आदि दोषरहित इति अर्थः। निर्गुणे अतिव्याप्तिवारणाय आह **सगुणाविति** अस्य माधुर्यौजः प्रसादाख्या ये गुणाः तत् सहित इति अर्थः। निरलङ्कारे अतिव्यप्तिवारणाय उक्तम् **अनलङ्कृति** इति। क्वचित् स्फुटालंकार विरहे अपि न काव्यत्वक्षतिः।**अलंकृति** इत्यत्र ईषदर्थे नञ् अलवणा यवागूः, अनुदरा कन्या इत्यादिवत्। पुनः क्वापि इत्यत्र अपिशब्दार्थः अनुक्तसमुच्चयार्थः। तथा च क्वचित् **"यः कौमारहरः...."** इत्यादौ स्फुटालङ्कारविरहेऽपि न काव्यत्वहानिः।

लक्षणमेतत् सर्वाङ्गत्वेन काव्यस्य स्वरूपं प्रतिपादयति। पूर्वाचार्यैः स्वीकृतं शब्दार्थयोर्महत्त्वं पूर्ववद् उपस्थाप्यते। अत्र काव्ये प्रसादादिगुणानां महत्त्वं स्वीक्रियते। काव्ये उत्कटदोषाभावे विशेषरूपेण अवधानं दत्तम्। अनलङ्कृती पुनः क्वापि इत्यनेन अलङ्काराणां गौणत्वं प्रतिपाद्यते। तदभावेऽपि न काव्यत्वक्षतिः।